International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2023; 9(1): 215-219
© 2023 IJSR
www.anantaajournal.com
Received: 02-12-2022
Accepted: 08-01-2023

**Murali Krishna V**
Research Scholar, Rajeevgandhi Campus, Sringeri, National Sanskrit Universtiy, Tirupati, Andhra Pradesh, India

# प्रश्नशास्त्रग्रन्थेषु होराकृष्णीयस्य वैशिष्ट्यम्

## Murali Krishna V

**DOI:** https://doi.org/10.22271/23947519.2023.v9.i1d.2002

सारांश
प्रश्नशास्त्रस्य प्रश्नायनम्, प्रश्नवैष्णवः, केरलीयप्रश्नशास्त्रसंग्रहः इत्यादयः बहवः ग्रन्थाः साम्प्रतम् उपलभ्यन्ते। इतरेभ्यः ग्रन्थेभ्यः कृष्णाचार्यविरचितस्य होराकृष्णीयस्य वैशिष्ट्यं-वैलक्षण्यं वर्तते । अस्मिन् शोधपत्रे होराकृष्णीयस्थ वैशिष्ट्यं यथामति प्रतिपादयामि ।

कूटशब्दः होराकृष्णीयम्

## प्रस्तावना

परमेश्वरस्य उच्छ्वास-निःश्वासरूपाः वेदाः मानवानां जीवने धर्मादिप्रबोधकाः भवन्ति । वेद-शास्त्रादिकं विना धर्मस्य ज्ञानं-अनुपालनं च अस्माकं दुश्शकमेव । अतः धर्माचरणेनैव मानवानां इतर पुरुषार्थसिद्धिः जायते । परमकारुणिकाः मन्त्रद्रष्टारः महर्षयः लोकाय तान् ऋगादि चतुरःवेदान् उपदिदिशुः। वेदस्य शिक्षादिषडङ्गानि सन्ति यथा-

शिक्षाव्याकरणं छन्दो निरुक्तं ज्योतिषं तथा ।
कल्पश्चेति षडङ्गानि वेदस्याहुर्मनीषिणः [1]॥

**Corresponding Author:**
**Murali Krishna V**
Research Scholar, Rajeevgandhi Campus, Sringeri, National Sanskrit Universtiy, Tirupati, Andhra Pradesh, India

[1] पाणिनीयशिक्षा

वेदपुरुषस्य विद्यमानेषु षडङ्गेषु ज्योतिषमित्याख्यमङ्गं नेत्ररूपेण भासते ।"वेदस्य चक्षुः किल शास्त्रमेतत्[2]" इति । वेदप्रतिपादितयज्ञानुष्ठानकालज्ञानार्थमिदं शास्त्रं प्रवृत्तम् । विना कालज्ञानं वेदोक्तकर्मानुष्ठानं नैव सिद्ध्यति । यथा-

वेदास्तावत् यज्ञकर्मप्रवृत्ताः यज्ञाःप्रोक्ताः ते तु कालाश्रयेण ।
शास्त्रादस्मात् कालबोधो यतस्स्यात् वेदाङ्गत्वं ज्यौतिषस्योक्तमस्मात्[3] ॥

एतज्ज्योतिश्शास्त्रस्यापि "जातक-गोल-निमित्त-प्रश्न-मुहूर्त-गणित" इति षडङ्गानि सन्ति। यथा-

जातकगोलनिमित्तप्रश्नमुहूर्ताख्यगणितनामानि ।
अभिदधतीह षडङ्गान्याचार्या ज्योतिषे महाशास्त्रे[4] ॥

**प्रश्नशास्त्रस्य प्रासङ्गिकता**

जातकादि षडङ्गेषु प्रश्नाख्यस्य अङ्गस्य अतीव प्राशत्यं-माहात्म्यं च वर्तते । मनुष्यस्य जननसमयं विज्ञाय तत्काले अश्विन्यादि नक्षत्रेषु विद्यमानान् ग्रहान् आधारीकृत्य तस्य जातकचक्रं निर्मान्ति दैवज्ञाः । पूर्वजन्मनि मानवेन सदसत् कर्म यत् कृतं, तत्कर्मानुसारं ग्रहाः इह जन्मनि जातकस्य शुभाशुभफलानि व्यञ्जयन्ति ।अत एव उच्यते वराहमिहिरेण –

"कर्मार्जितं पूर्वभवे सदादि यत्तस्य पक्तिं समभिव्यनक्ति[5]"

जन्मजातके विद्यमानग्रहस्थित्यनुसारेण पुरुषः शुभाशुभाफलानि अनुभवति इति तात्पर्यम् । जातके विद्यामाने सति किं प्रयोजनं प्रश्नशास्त्रस्य ? इति जिज्ञासायामुच्यते प्रश्नमार्गकारः-

कस्य पक्तिरितिज्ञातुमिदानीं पूर्वकर्मणाम् ।
इहार्जितं च विज्ञातुं कर्म प्रश्नो विधीयते[6] ॥ इति

मनुजेन अनुभूतं-अनुभूयमानं च यत् शुभाशुभफलं सर्वमपि कर्मार्जितं भवति ।पूर्वजन्मन्यार्जितं कर्म जातकवशात् अस्माभिः ज्ञायते एव ।किन्तु इहजन्मनि पुण्य-पापकर्मभिः आर्जितं सर्वमपिकर्म प्रश्नप्रसङ्गादेव ज्ञायते । यदा पृच्छकस्य जातकवशात् प्रश्नः गुणदोषादिभिः विभिद्यते तदा तेन जातकेन इहार्जितकर्मभिः शुभाशुभफलमनुभवति इत्यवगन्तव्यम् । अत एव शास्त्रकाराः-

यदा जातकतः प्रश्नः गुणदोषैर्विभिद्यते ।
तदा शुभाशुभं विद्यात् कर्मभेदैरिहार्जितैः[7] ॥

विना प्रश्नशास्त्रज्ञानं, फलकथनं सर्वमपि स्फुटतां नप्राप्नोति ।अत एव प्रश्नशास्त्रस्य अतीवैशिष्टं वर्तते ।

**होराकृष्णीयस्य वैशिष्ट्यम्**

प्रश्नशास्त्रस्य प्रश्नायनम्, प्रश्नवैष्णवः, केरलीयप्रश्नशास्त्रसंग्रहः इत्यादयः बहवः ग्रन्थाः साम्प्रतम् उपलभ्यन्ते। इतरेभ्यः ग्रन्थेभ्यः कृष्णाचार्यविरचितस्य होराकृष्णीयस्य वैशिष्टं-वैलक्षण्यं वर्तते । अत एव प्रश्नमार्गकारः एवमभिप्रैति यत् ये कृष्णीयशास्त्रं (होराकृष्णीयम्) अध्ययनं कुर्वन्ति, तेषां विद्वत्सभासु प्रत्येकं आदरं-गौरवं च लभ्यते इति ।

यथा-

"कृष्णीयशास्त्रमपि भर्तृमतीवसूत्रं तेषां सभासु भवती महतीव शोभा ।[8]"

---

[2] सिद्धान्तशिरिमणिः मध्यमाधिकारः११ श्लो
[3] सिद्धान्तशिरिमणिः/मध्यमाधिकारः९१श्लो
[4] प्रश्नमार्गः- १ अध्यायः/
[5] बृहज्जातकम्-प्रथमाध्यायः-३ श्लोकः
[6] प्रश्नमार्गः-१ अध्यायः-४१
[7] प्रश्नमार्गः-१ अध्यायः-४३
[8] प्रश्नमार्गः-१/२९

केरलराज्ये होराकृष्णीयनामकः प्रश्नशास्त्रग्रन्थः प्रसिद्धः ।अस्मिन् ग्रन्थे ३२ अध्यायाः ५२४ श्लोकाः सन्ति। ग्रन्थकर्ता कृष्णाचार्यः सरलरीत्या आर्याछन्दसा सर्वान् श्लोकान् व्यरचि ।

विद्यमानेषु बहुषु प्राश्निकविषयेषु नष्ट-चोर-वृष्टि-भोजन-गृह-प्रोषित-आनुकूल्यादिप्रश्नविचाराः अतीव सूक्ष्मतया उपदिष्टाः आचार्येण। तथैव वस्तूनां धातु-मूल-जीवादि विभागक्रमः , प्रष्टुःफलप्राप्तिकालः, आयुर्विचारः, नष्टजातकविषयः, राहु-केत्वोःविशेषविचारः, ग्रहाणां रश्मिचन्तनमित्यादि बहवः जनबाहुल्यविचाराः अत्र प्रतिपादिताः । तेषु विषयेषु द्वि-त्रान् विषयान् स्वीकृत्य अस्मिन् शोधपत्रे मया पस्तूयते।

## जलप्रश्नविचार

वृष्टि-कूप-नदी इत्यादि भेदैः जलसम्बन्धप्रश्नाः भवन्ति ।वृष्टिः कदा जायते ? कूपे जलं जनिष्यति वा न ? इत्यादि विषयान् पृच्छकाः दैवज्ञं पृच्छन्ति । तदा प्रश्नशास्त्रमनुसृत्य तत्कालारूढ-ग्रहस्थितिं च संवीक्ष्य फलानि ब्रुवते दैवज्ञः । कस्मात् भावात् कीदृशः विचारः कर्तव्यः? इति कृष्णीये सुष्टु प्रतिपादितम् आचार्येण। यथा-

हिबुकेनाधःसलिलं नद्यागमनं तु सप्तमेनैव ।
दशमेन वृष्टिपतनं ब्रूयादुदयेन तत्त्रितयम्[9]॥

चतुर्थस्थानात् भूमौ विद्यमानं जलं(कूप-वाप्यादिनिर्माणे), सप्तमस्थानात् नद्याः अगमनं-स्थितिश्च, दशमस्थानात् वृष्टेः आगमनम्, एतत्त्रयमपि पुनः उदयलग्नात् चिन्तनीयमिति प्रत्यपादयत् । तथैव पूर्वाचार्योपदिष्ट शुष्क-जल-आश्रयभेदसंज्ञकग्रहान् , सजल-विजलराशींश्च ज्ञापयति ।
यथा-

शुष्कारविकुजसौरा भृगुचन्द्रमसौ जलात्मकौ ज्ञेयौ ।
आश्रयौ गुरुसौम्यौ बलिनावित्युक्तमचार्यैः[10]॥

वृश्चिक वृष कर्कटकास्सप्तममृगमकरमत्स्यकुम्भधराः ।
सजलद्वयसम्पाते प्रभूतमुदकं विनिर्देश्यम्[11]॥

रवि-कुज-शनिनः शुष्कग्रहाः । चन्द्र–शुक्रौ जलग्रहौ, गुरु-बुधौ आश्रयग्रहौ । अर्थात् बलिनौ गुरुबुधौ तयोः राशियोगवशात् फलानि दद्याताम्।

वृश्चिक-वृषभ-कर्काटक-तुला-सिंह-मकर-मीन-कुम्भराशयः सजलराशयः । अवशिष्टाः मेष-मिथुन-कन्या-धनूराशयः शुष्कराशयः भवन्ति ।

**पूर्वोक्तयोः प्रयोजनमेवं प्रस्तौति-**

जलवत्यजलेन गते अधस्तात् जलं उपरि भवति विपरीतम्।
सजलद्वयसम्पाते प्रभूतमुदकं विनिर्देश्यम्[12]॥

पृच्छासमये जलराशौ(वृश्चिक-वृषभ-कर्काटक-तुला-सिंह-मकर-मीन-कुम्भ) शुष्कग्रहे गते सति अधः जलमस्ति, न तु उपरि। खनने सति यत्नेन लभ्यते इति वाच्यम्। एतद्वैपरीत्येन, जलग्रहः अजलराशौ(मेष-मिथुन-कन्या-धनुः) विद्यते सति उपरि एव जलमस्ति, अचिरेण लभ्यते इति वाच्यम् ।यदा जलग्रहः, जलराशौ एव स्थिते सति प्रभूतमुदकं अस्तीति पृच्छकाय विनिर्दिशेत् ।जलराशि–जलग्रहयोःयोगादि सम्बन्धः नास्ति चेत् तदा उदकाभावः वाच्यः ।

## प्रोषितप्रश्नविचार

गृहात्/स्वस्थानात् वा निःसृतस्य मनुष्यस्य गमनदिक्, तस्य स्थितिः, प्रत्यागमनमित्यादि सर्वं अस्मिन् प्रश्ने विचार्यते । प्रष्टुः प्रश्नारूढोदयादिवशात् स्थितग्रहादिकं दृष्ट्वा प्रोषितस्य विचारः क्रियते दैवज्ञेन। प्रश्नमार्ग-प्रश्नानुष्ठानपद्धतिःइत्यादि ग्रन्थेष्वपि

[9] प्रश्नमार्गः-१४/१६

[10] होराकृष्णीयम्-४/१

[11] होराकृष्णीयम्-४/२

[12] होराकृष्णीयम्-४/३

प्रोषितप्रश्नःउपदिष्टः । कृष्णीये तु प्रोषितप्रश्नविचारे वैलक्षण्यं दृश्यते। यथा-

यतिमे ग्रहो विलग्नाद्राशौ स्यात्तेन राशयोऽभ्यस्ताः ।
आदेश्यः फलपाकः प्रवासविनिवृत्तिषु स कालः[13] ।।

प्रवासगतस्य पुरुषस्य प्रत्यागमनं कियद्दिनैः भवतीति अनेन श्लोकेन ज्ञायते । लग्नाधिपतेः नवांशस्थितिं ज्ञात्वा तन्नवांशप्रमाणं नव (९) संख्यया संगुण्य अष्टोत्तरशतेन विभजिते सति प्रोषितस्य पुरुषस्य वा स्त्रियः प्रवासात् आगमन क्षण-दिनादिकालः ज्ञायते इति केषांचिदभिप्रायः । केचनाचार्याः एवमभिप्रयन्ति यत् यस्मिन् संख्याकराशौ प्रवासादिनिवृत्तिकारको ग्रहः भवति, तां संख्यां द्वादशसंख्यया संगुण्य तदानीं प्राप्तसंख्यया परिच्छिन्ने दिने-मासे-वत्सरे-वा प्रवासादिं कथयेत् इति । ग्रहः स्थिरराशौ चेत् वत्सरः, उभयराशौ चेत् मासः, चरराशौ दिनमिति वाच्यम् । कारकग्रहस्तु-

इष्टभावादधस्थो वा लग्नगो केन्द्रगोऽपि वा ।
बली वा योगकर्ता वा कारकग्रह इष्यते[14]।।

इष्टभावः नाम निवृत्तिप्रश्ने सप्तमः, प्रवासप्रश्ने दशमः, गृहप्रवेशप्रश्ने चतुर्थः, पुत्रप्रश्ने पञ्चमः। तत्तद्भावाधिपः तत्तद्भावादधस्थे राशौ , तत्तद्भावकेन्द्रराशौ वा स्थिते सति स ग्रहः कारकग्रहःइत्युच्यते । प्रबलग्रहः वा, अथवा योगकर्ता एतेषु अन्यतमोऽपि कारकग्रहेण व्यवह्रियते। ग्रहाणां तत्कालबलवशात् कारकग्रहं जानीयात् । अन्यप्रकारेण पुनःप्रोषितस्यागमनकालमुच्यते । यथा-

दीर्घाल्पमध्यमत्वे राशीनां सूर्यभुक्तिलक्ष्यांशैः
ग्रहचारनष्टजातकविधिभिश्चैवादिशेत् कालम्[15]।।

प्रश्नकाललग्नं यदि चरराशिगतं चेत् तर्हि मेषादारभ्य सूर्यस्थितनवांशकपर्यन्तान् अंशान् लग्ने उदितांशैः संगुण्य १०८ संख्यया विभजेत् ।शेषेण फलदायकग्रहस्य क्षणाद्यादिकालः ज्ञायते । प्रवासगतस्यागमनकालः भवतीत्यर्थः।
स्थिरलग्नोदये सति यस्मिन् राशौ रविः स्थितः तद्राशेरुदितांशान् पूर्ववत् गुणित्वा अष्टोत्तरशतेन विभजेत् । अवशिष्टसंख्यया आगमनकालो जानीयात्।
प्रश्नलग्नं उभयोदयराशिश्चेत् रविस्थितनवांशादुपरि यावन्मीनान्तांशान् उदितलग्नांशैः गुणित्वा पूर्ववत् भागहृते सति या संख्याऽवशिष्टा स कालो आगमनकालः भवति।
आगमनहेतुकग्रहकालं "अयनक्षणवासरर्तवो मासोर्धं च समा च भास्करात्"[16] इति नियमात् प्रोषितस्य पुनरागमकालं निर्दिशेत्। यथा- आगमनहेतुकः ग्रहः चन्द्रश्चेत् तावन्तो नाडीद्वयपरिमिते काले प्रोषितस्यागमनमिति। कुजश्चेत् तावन्तो दिवसाः, शुक्रश्चेत् तावन्तो पक्षाः, गुरुश्चेत्तावन्तो मासाः, बुधश्चेत्तावन्त ऋतवः, सूर्यश्चेत्तावन्त्ययनानि, शनिश्चेत्तावन्तः संवत्सरा इति ।
यातुः प्रवासस्थलमपि प्रश्नलग्नोदयवशात् ज्ञातुं शक्यते । यथा-

अटवीक्षेत्रग्रामाम्बुगिरिग्रामापणगुहारामाः
नद्यामुखं सरोर्णव इति देशास्वजादीनाम्[17] ।।

प्रश्नलग्नं मेषराशिश्चेत् अटवी इति ज्ञातव्यम् ।वृषश्चेत् क्षेत्रम्, मिथुनम् = ग्रामः, कर्कः= जलम्, सिंहः= गिरिप्रदेशः, कन्या=ग्रामः, तुला= आपणः, वृश्चिकः= बिलप्रदेशः, धनुः=आरामः, मकरः= नदी, कुम्भः= सरः, मीनम्= समुद्रः इति । अन्यदप्याह-

लग्नार्कचन्द्रभुक्तैर्होराभागांशकैः यथासंख्यम्।
वर्षं मासं दिवसं ग्रहगत्या वा वदेत् कालम्[18]।।

13 कृष्णीयम्- ५/१
14 कृष्णीयम्- ५/१ श्लोकस्य चतुरसुन्दरीव्याख्यायां
15 कृष्णीयम्- ५/२
16 बृहज्जातकम्-२/१४
17 कृष्णीयम्- ५/३
18 कृष्णीयम्- ५/७

उदयलग्न-रवि-चन्द्रैः क्रमेण प्रोषितस्य वर्ष-मास-दिनाद्यागमनमुच्यते । उदयलग्नस्फुटं रविस्फुटेन, रविस्फुटं चन्द्रंशकस्फुटेन, चन्द्रांशकस्फुटं उदयलग्नंशकस्फुटेन संगुण्य, गुणपिण्डत्रयं पृथक् पृथक् पञ्चत्रिंशदधिकेन शतेन (१३५) विभजेत् । तदा उदयलग्नपिण्डशेषात् संवत्सरः, रविपिण्डशेषवशात् मासः, चन्द्रपिण्डशेषवशात् दिवसाः क्रमेण भवन्ति।

इतोऽप्यनेकैः प्रकारैः प्रोषितस्यागमननिर्णयः होराकृष्णीये दरीदृश्यते । नष्टप्रश्नादिविषयेष्वपि अतिसूक्ष्मविचारः कृतः आचार्येण । अत एव इदं होराकृष्णीयं विद्यमानेषु प्रश्नशास्त्रग्रन्थेषु मूर्ध्निस्थनम् अलङ्करोति ।

## References


1. Prashna Marga. Guruprasada gour, chowkhamba Sanskrit series, Varanasi
2. Hora Krishneeyam NE. Muttuswamy- Sagar Publications, New Delhi
3. Siddhanta shiromani – Bapudeva sastri, chowkhamba Sanskrit series, Varanasi
4. Brihajjatakam- kedaradatta joshi, Motilal banarsidass, Newdelhi
5. Paniniya Siksha